M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 1446

Title: Rg-Veda 1st Mandal

1446

Incomplete

C

Rig-Veda - 1st Mandal		Title
		Author
		Editor
		Year, Vols.
SK		Publisher
1446		Remarks

24/11/51

कमहे। मृळीकायोरुचक्षसं॥५॥ तदित्समानमाशाते वेनंता न प्रयुच्छतः। धृतव्रताय
दाशुषे। वेदा यो वीनां पदमंतरिक्षेण पततां। वेद नावः समुद्रियः। वेद मासो धृतव्रतो
द्वादश प्रजावतः। वेदा य उपजायते। वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः। वेदा ये
अध्यासते। नि षसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय सुक्रतुः॥१०॥
अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा। स नो विश्वाहा सु
क्रतुरादित्यः सुपथा करत्। प्र ण आयूंषि तारिषत्। बिभ्रद्द्रापिं हिरण्ययं वरुणो व २४
स्त निर्णिजं। परि स्पशो नि षेदिरे। न यं दिप्संति दिप्सवो न द्रुह्वाणो जनानां। न देवम
भिमातयः। उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा॥१५॥ परा मे
यंति धीतयो गावो न गव्यूतीरनु। इच्छंतीरुरुचक्षसं। सं नु वोचावहै पुनर्यतो मे

तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे । शुनःशेपो यमह्वद्गृभीतः सो
अस्मान्राजा वरुणो मुमोक्तु । शुनःशेपो ह्यह्वद्गृभीता[redacted]ष्वादित्यं द्रुपदेषु बद्धः । अवै
नं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् । अव ते हेळो वरुण न
मोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्र
थः कृतानि । उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वय
मादित्य व्रते तवानागसो अदितये स्याम ॥१५॥ यच्चिद्धि ते विशो यथा प्र देव वरुण
व्रतं । मिनीमसि द्यविद्यवि । मा नो वधाय हत्नवे जिहीळानस्य रीरधः । मा हृ
णानस्य मन्यवे । वि मृळीकाय ते मनो रथीरश्वं न संदितं । गीर्भिर्वरुण सीमहि । परा
हि मे विमन्यवः पतन्ति वस्यइष्टये । वयो न वसतीरुप । कदा क्षत्रश्रियं नरमा वरुणं क